श्री गौरगोविन्द-नाम-
कीर्त्तनरत्नमाल

(द्वितीय संस्करण)

श्रीमनोहरदास द्वारा
विरचित :

प्राप्ति स्थान :—

श्रीमनोहर ग्रन्थागार

श्री गोविन्द कुन्ड, गोवर्द्धन, मथुरा ।

प्रकाशक :

श्री ब्रजानन्द दास

सन् १९६८

मूल्य —(प्रचारार्थ) केवल २५ पैसे

Vrindavan Das
Govind Kund, Vrindavan
Nityananda Baba Ashram

१०८ श्री सिद्ध श्री मनोहरदास बाबा महाराज



১০০৮ শ্রীল পণ্ডিত মনোহর দাস বাবাজী

द्वादशादित्यसंकाशः प्रकाशाद्वादशः स्मृतः।
कुरसं प्रलयं नीतः परेश-रस-भासकः ।।

भूमिका

★

श्री भगवान् तथा भगवत्परिकर एवं भगवद्भृत्यगणों के नाम संकीर्तन से साधक के हृदय में भगवान् के रूप गुण लीला के क्रम से उदय होने पर पापादि यातनांश प्रेम के प्रतिबन्ध अपराधांश एवं अविद्याकारक सूक्ष्म जाड्यांश क्रम से नष्ट होकर शुद्ध भगवद्रति, पञ्चम पुरुषार्थ प्रेमरस वस्तु का उदय होता है। इस लिये इसकलि काल में विशेष रूप से नाम ही मुख्य साधन है। वह साधन वैधी एवं रागानुगा के भेद से दो प्रकार का है। रागानुगा मुख्य साधन में गोपी-अनुगत भाव साधक-हृदय में धारण करना होता है, उसमें श्री गोपीजन-जन नाम कीर्तन ही प्रेम प्रदान का मुख्य उपाय है, श्री गोपीजन करुणा-कण के प्रकाश से ही श्री गोपीनाम रत्नमाला प्रकाशित हुई है। उस ग्रन्थ की कर्णिका में राधाकृष्ण हैं। उत्तर दिशा से दक्षिण की ओर परिक्रमा के रूप में आठों ओर केशरों में प्रधान श्रीरूप आदि आठ मञ्जरियाँ, अष्टदल में उसके बाद आठ प्रधान सखी ललिता आदि हैं। प्रधान उपदलों में अनंगादि अष्ट मञ्जरियों एवं तदुपरान्त सामान्य उपदलों में सम्पूर्णादि सामान्य मञ्ज-रियों का कीर्तन एवं यथा स्थान लीलाधिदेवी योगमाया वन देवी दूती परिचरी सभी का सन्निवेश होकर महायोग पीठ एवं वर्ण वस्त्रादि के परिज्ञान के साथ गोपीजन नाम हैं। अन्त में श्री राधानाम से ग्रन्थ पूर्ण होता है। साधक वे नाम कीर्तन करते करते श्री भगवद्रूप गुण आदि की स्फूर्ति के क्रम से हृदय में श्री

लीलादेवी का उदय होता है। तब साधक कर्ण मुख, मन में लीला भावृत्ति करते रहने पर यदि साधक के हृदय में काषायादि भी रहे तो भी अविचिन्त्य विचित्र लीला शक्ति से दूर करके अप्राकृत प्रेमरस रूप में स्वयं स्थित होती है। इसका दृष्टान्त— जैसे कच्चे तीते खट्टे दोषों से युक्त नीम आम आदि के फलमें समय पाकर मधुर रसके संचार होने पर तीते आदि दोषों का नाशक मधुरता प्राप्त होती है। यद्यपि उस फल में तीतापन नहीं रहता और अति मधुरता प्राप्त होती है वैसे ही वस्तुशक्ति का प्रभाव है।

जैसे श्री भागवत में—

विक्रीड़ितं व्रजवधूभिरिदञ्च विष्णोः।
श्रद्धान्वितोऽनु शृणुयादथ वर्णयेद्यः॥
भक्तिं परां भगवति प्रतिलभ्य कामं।
हृद्रोगमाश्वपहिनोत्यचिरेण धीरः॥

इसका अर्थ है—मैं भगवदंश जीव हूँ मेरे परम पिता परम स्वामी भगवान् है एवं उनके नित्यलीलापरिकरजनप्रमुख मेरी परम माता परम स्वामिनी हैं। वे आत्माराम और आत्मा—रामी होकर भी स्वानन्द में नव नव उल्लास के लिये प्राकृत तथा अप्राकृत, दिव्य अनेक लीलायें करते हैं। हम लोग जड़-रति तथा जड़-रति कार्यको छोड़कर हृदय में नित्य भगवद्रति का सहारा लेकर श्रद्धालु होकर उस लीला की कर्ण आदि त्रय में आवृत्ति करके सब काषायदि का नाश कर प्रेमरस परम पदार्थ प्राप्त करके आत्यंतिक दुःख नाश एवं आत्यंतिक सुख प्राप्त करेंगे ॥इति॥

जड़ीयरतिमाश्रित्य जड़पिण्ड सुखेच्छुकः।
असत्कीर्तिदं रसं न पश्यतु सुखं हि सः॥

* अथ श्रीकृष्ण-चैतन्याय नमः *

—०×०—

अद्वैतप्रकटीकृतो नरहरिप्रेष्ठः स्वरूपप्रियो
नित्यानन्द-सखः सनातन-गतिः श्रीरूप-हृत्केतनः।
लक्ष्मी-प्राणपतिर्गदाधर-रसोल्लासी जगन्नाथ-भूः
साङ्गोपाङ्गसपार्षदः स दयतां देवः शची-नन्दनः ॥१॥

श्री बृहद्भागवतामृते—

—०×०—

भौमे चास्मिन् सपदि मथुरामण्डले यातमात्रात्
सिद्धेयुस्ताः सकलसमये यस्य कस्यापि नैव।
किन्त्वेतस्य प्रियजनकृपापूरतः कस्यचित् स्यु-
स्तद्भो'! मातश्चिनु पदरजस्तत्पदैकप्रियाणाम् ॥२॥

श्री स्तवावल्याम्—

असच्चेष्टा-कष्टप्रदविकटपाशालिभिरिह
प्रकामं कामादिप्रकटपथपातिव्यतिकरैः।
गले बद्ध्वा हन्येऽहमिति वकभिद्वर्त्मपगणे
कुरु त्वं फूत्कारानवति स यथा त्वां मन इतः ॥३॥

—०×०—

* अथ श्री वैष्णव-वन्दना *

—०×०—

श्रीविष्णोर्वैष्णावानाञ्च वन्दनं परमं शुभम्।
वैष्णववन्दनं तत्र कृष्णतोषकरं स्मृतम् ।।१।।
श्रीकृष्णप्रियवस्तूनां वैष्णवः परमः प्रियः।
तस्मात् प्रियतमं ज्ञेयं तदीयानाञ्च वन्दनम् ।।२।।
स एष वैष्णवो मया मूढेनातत्त्ववेदिना।
वन्दाय यत्यते तत्र तद्गुणं लोभनं परम् ।।३।।
शरणं वैष्णवश्चात्र दयार्द्रः करुणामयः।
आविर्भूय मनोबुद्धौ जिह्वारतिं प्रयच्छतु ।।४।।
वन्दे गुरुपदद्वन्द्वं वैष्णव-पदपंकजम्।
क्षान्त्वा चागणितं दोषमात्मसान्मां करोतु वै ।।५।।
वन्दे श्रीलजगन्नाथं द्विज-मिश्र-पुरन्दरम्।
श्रीशचीं शंकरारण्यं पुत्रं वन्दे महाप्रभुम् ।।६।।
हाड़ाइ पण्डितं वन्दे वन्दे पद्मावतीं तथा।
नित्यानन्दसुतं वन्दे रोहिणीनन्दनं पुरा ।।७।।
कुबेराचार्यकं वन्दे नाभादेवीञ्च तत्प्रियाम्।
तत्सुतं श्रीमहाविष्णुं वन्दे आचार्यमीश्वरम् ।।८।।
माधवेन्द्रपुरीं वन्दे श्रीईश्वरपुरीं तथा।
वन्दे श्रीपरमानन्दपुरीं विष्णुपुरीं ततः ।।९।।

रघुनाथ पुरीं वन्दे कृष्णानन्दपुरीं तथा ।
श्री नृसिह सुखानन्दपुरीं वन्दे अनन्तकम् ॥१०॥
वन्दे विश्वेश्वरानन्दं दामोदर-पुरीं तथा ।
श्री गोविन्दं ब्रह्मानन्द पुरीं वन्दे तत; परम् ॥११॥
रामचन्द्रपुरीं वन्दे वन्दे केशवभारतीम् ।
ब्रह्मानन्दं बलरामभारतीं प्रणमाम्यहम् ।१२॥
श्री रामानन्दभारतीं बल्लभभारतीं तथा ।
श्री यदुनन्दनं वन्दे श्यामानन्दञ्च भारतीम् । १३॥
वन्दे श्रीकृष्णचैतन्यं श्री गौराङ्गमहाप्रभुम् ।
नित्यानन्दप्रभुं वन्दे प्रेम्णाविधौत वग्रहम् ॥१४॥
श्री अद्वैतप्रभुं वन्दे श्रीगदाधरपण्डितम् ।
श्री वासपण्डितं बन्दे भक्ताख्यं भक्तिदायकम् ॥१५॥
वन्दे विष्णुप्रियां लक्ष्मीं वसुधां जाह्नवीं तथा ।
वन्दे सीताठाकुरानीं श्रीठाकुरानीमातरम् ॥१६॥
वन्दे श्रीमालिनीं ठाकुरानीं भक्ति प्रदायिणीं ।
सर्वां ठाकुराणीं वन्दे गौराङ्गभक्तितत्पराम् ॥१७॥
वन्दे श्रीलवीरचन्द्रं वीरभद्रैकनामकम् ।
नित्यानन्दसुतां वन्दे गंगांभुवनपावनीम् ॥१८॥
वन्दे श्रीअच्युतानन्दं श्रीबलराम मिश्रकम् ।
श्री कृष्णमिश्र गोपालौ रूपं श्रीजगदीशकम् ॥१९॥
गोस्वामिचरणं वन्दे श्रीरूपं श्रीसनातनम् ।
भट्टयुग्मं नमस्कृत्य दासगोस्वामिने नमः ॥२०॥

श्री जीवं लोकनाथञ्च श्रीभूगर्भं प्रणम्य च
कवीनां राजकं वन्दे कृष्णदासमहं सदा ॥२१॥
श्री स्वरूपमहं वन्दे रामानन्दण्यं तथा।
वन्दे सेनशिवानन्दं रामानन्दवसुं ततः ॥२२॥
घोष-श्री माधवं वन्दे गोविन्दानन्दकं तथा।
श्री गोविन्द-वासुदेव-घोषौ वन्दे यतात्मना ॥२३॥
श्री चन्द्रशेखरं वन्दे आचार्यरत्न-भूषितम्।
श्रीरत्नगर्भ-ठाकुरं प्रणमामि ततः परम् ॥२४॥
श्रीगोविन्दं प्रणम्याथ गरुड़ाय नमस्ततः।
दत्ताग्रपदसंयुक्त मुकुन्दमभिवादये ॥२५॥
दामोदरकृष्णदासौ कृष्णानन्दं प्रणम्य च।
आचार्यमाधवं वन्दे चक्रवर्तिनीलाम्बरम् ॥२६॥
नमः श्रीरामचन्द्राय वासुदेवाय मे नमः।
नन्दनाचार्यकं वन्दे शङ्करठक्कुरं ततः ॥२७॥
श्री सुदर्शनसुबुद्धिमिश्रौ नत्वा ततः परम्।
श्री रामपण्डितं वन्दे श्रीजगन्नाथदासकम् ॥२८॥
जगदीशसदाशिवौ वन्दे रायमुकुन्दकम्।
मुकुन्दानन्दकं वन्दे आचार्य श्री पुरन्दरम् ॥२९॥
श्रीनारायणवाक्पतिं नत्वा नियतमानसः।
श्रीमधुपण्डितं वन्दे करश्रीमकरध्वजम् ॥३०॥
द्विजरघुनाथं वन्दे विष्णुदास-पुरन्दरौ।
गोविन्दाचार्यकं वन्दे परमानन्दगुप्तकम् ॥३१

श्रीबलराम—दासञ्चकाशीमिश्रं प्रणम्य च ।
शिखिमाहातिकालीदास–श्रीमत्पण्डितान् भजे ॥३२॥
ठक्कुरं श्रीकविचन्द्रं वन्दे हिरण्यगर्भकम् ।
सेनोत्तरजगन्नाथं द्विजपीताम्बरं भजे ॥३३॥
राघवपण्डितं वन्दे श्रीरुद्रपण्डितं तथा ।
मकरध्वजपण्डितं वन्दे कंसारिसेनकम् ॥३४॥
श्रीजीवपण्डितं वन्दे मुकुन्दकविराजकम् ।
कनिष्ठश्रीहरिदासं कविचन्द्रं नमाम्यहम् ॥३५॥
मकरध्वजसेनञ्च विद्यावाचस्पतिं तथा ।
गोविन्दठक्कुरं वन्दे कविकर्णपूरं ततः ॥३६॥
श्रीकान्तठक्कुरं वन्दे वन्दे माधवपण्डितम् ।
प्रबोधानन्दकं वन्दे बलभद्रं नमाम्यहम् ॥३७॥
नमः श्रीपरमानन्दगुप्ताय बल्लभाय च ।
वनमालिजगदीशौ वन्दे श्री निधिपण्डितम् ॥३८॥
श्रीकरपंडितं बन्दे लक्ष्मणाचार्यकं तथा ।
पुरुषोत्तमपंडितं वन्दे महान्तशेषकम् ॥३९॥
नमः श्रीअभिरामाय सुन्दरानन्दकाय च ।
धनञ्जयगौरीदास-पंडितौ प्रणमाम्यहम् ॥४०॥
वन्दे श्रीकमलाकरपिप्पलाइं महाबलम् ।
दत्तउद्धारणं वन्दे महेशपंडितं तथा ॥४१॥
पुरुषोत्तमदासञ्च पंडितपुरुषोत्तमम् ।
वन्दे श्रीपरमेश्वरं कालाकृष्णञ्च श्रीधरम् ॥४२॥

श्रीदासचक्रवर्त्तिनं गोकुलानन्दकं तथा ।
श्री श्यामदास-श्रीदास चक्रवर्तिद्वयं भजे ॥४३॥
गोविन्दरामचरणौ प्रणम्य चक्रवर्तिनौ ।
श्रीरामचन्द्रगोविन्दकविराजावहं भजे ॥४४॥
कर्णपूरं श्रीनृसिंहकविराजं प्रणम्य च ।
भगवन्वल्लवीगोपीरमणान् प्रणमाम्यहम् ॥४५॥
ततः श्री गोकुल—कविराजं नित्यं प्रणम्य च ।
नमः श्रीगौरभक्ताय नमो गौरजनाय च ॥४६॥
नमः श्रीरामतीर्थाय वसुदेवाय च मे नमः ।
प्रणम्यानुभवानन्दं चिदानन्दं नमाम्यहम् ॥४७॥
तीर्थश्रीलजगन्नाथं वन्दे श्रीनाथपंडितम् ।
विजयपंडितं वन्दे जगदानन्दकं तथा ॥४८॥
नकुलब्रह्मचारिणं वन्दे श्रीवत्सपंडितम् ।
वन्दे पुण्डरीकविद्यानिधिं शुक्लाम्बरं तथा ॥४९॥
वन्दे भागवताचार्यं श्रीनारायणपंडितम् ।
श्रीवंशीवदनं वन्दे रामाइं नन्दाइं तथा ॥५०।
श्रीमीनकेतनं रामदासं नित्यं प्रणम्य च ।
नन्दिनीं जङ्गलीं वन्दे श्रीवक्रेश्वरपंडितम् ॥५१॥
श्री गोपीजनबल्लभं वन्दे चैतन्यदासकम् ।
वन्दे हरिहरानन्दं शिवाइं विष्णाइं तथा ॥५२॥
वन्दे विष्णु-दासाचार्यमाचार्य चक्रपाणिकम् ।
श्रीरामभद्रकं वन्दे भास्करठकुरं तथा ॥५३॥

वन्दे यदुकविचन्द्रं कृष्णदासादिकं तथा।
सुग्रीवमिश्रकं वन्दे कविराज-सदाशिवम् ॥५४॥
वन्दे श्री तपनाचार्यं सिंहाँ कामाञ्च भट्टकम्।
श्रीधरश्रीहरिदास—ब्रह्मचारिद्वयं भजे ॥५५॥
वन्दे वैद्य रघुनाथं श्रीसूर्यदासमेव च।
आचार्य वैष्णवानन्दं वन्दे श्रीकानुठक्कुरम् ।५६॥
श्रीरंगकविराजञ्च श्रीमन्तं ज्ञानदासकम्।
दास-श्रीविजयं वन्दे भगवान्पंडितं तथा ॥५७॥
मिश्र-सनातनं वन्दे वल्लभाचार्यकं तथा।
श्री नाथ रामनाथञ्च पंडितवनमालिनम् ॥५८॥
शेखरपडितं वन्दे श्रीसत्यराजखानकम्।
श्रीमत्सेनञ्च संनम्य जानकीनाथाय नमः ॥५९॥
वन्दे यष्ठीवर कीर्त्तनीयं श्रीबुद्धिमन्तकम्।
वाणीनाथवसुं वन्दे कमलाकान्तकं तथा ॥६०॥
दास भागवतकं वन्दे श्रीमिश्रनयन तथा।
मंगलं वैष्णव नत्वा वन्दे श्रीमामुठक्कुरम् ॥६१॥
स्वामिनौ रामकृष्णौच वन्दे रायमुकुन्दकम्।
श्री हर्षं हृदयानन्दं वन्दे सयतमानसः ॥६२॥
श्रीहरिचरण वन्दे भोलानाथ जनार्दनौ।
नारायणीसुतं वन्दे श्रीबृन्दावनदासकम् ॥६३॥
ठक्कुरंश्रीहलायुधं वन्दे श्रीराम श्रीपती।
श्रीवासुदेवभादरं वन्दे ईशानदासकम् ॥६४॥

वन्दे वैद्यविष्णुदासं चन्दनेश्वरकं तथा ।
दासं गदाधरं वन्दे सारंगदासमेव च ॥६५॥
श्री यदुगांगुलीं वन्दे अनुपमादिकं तथा ।
लोचनन्ठकुरं वन्दे झडुदासादिकं ततः ॥६६॥
वन्दे ब्रह्महरिदासं श्रीगंगादासमेव च ।
सार्वभौममहं वन्दे प्रतापरुद्रकं तथा ॥६७॥
वन्दे मिश्रकाशोनाथ वाणीनाथं ततःपरम् ।
गोपीनाथं कलानिधिं सुधानिधिं च तत्परम् ॥६८॥
प्रद्युम्नमिश्रकं वन्दे श्रीभवानन्दरायकम् ।
श्रीदेवानन्दपंडितं वन्दे श्रीहरिभट्टकम् ॥६९॥
ओड्रविप्रदासं वन्दे कानाइखुटिया ततः ।
श्रीसिंहेश्वरतुलसोमिश्रौ वन्दे ततः परम् ॥७०॥
श्री नरहरिठक्कुरं मुरारिमुकुन्दौ तथा ।
श्रीरघुनन्दनं वन्दे चिरञ्जीवसुलोचनौ ॥७१॥
वन्दे श्रीलनरोत्तमठक्कुरं भक्तिभूपकम् ।
श्रीनिवासाचार्यं वन्दे श्रीश्यामानन्दठक्कुरम् ॥७२॥
प्रणम्य रसिकानन्दं वैष्णवं शरणं मम ।
नमः श्रीगौरगणाय वैष्णवाय नमो नमः ॥७३॥
वासिनो व्रजभूमौ ये वैष्णवगणाः पावनाः ।
वन्देऽग्रे चरणं तेषां सादरं नतमस्तकः ॥७४॥
श्री क्षेत्रवासिनो ये ये गौराङ्गगणवैष्णवाः ।
भूमौ निपत्य संवन्दे तेषां चरणपङ्कजम् ॥७५॥

वासिनः श्रीनवद्वीपे महाप्रभोश्च ये जनाः ।
अनुरक्तीभवन् वन्दे तेषाँ चरणमङ्गलम् ॥७६॥
धामे च नगरे क्षेत्रे पुर्यां गौड़देशेऽथवा ।
ग्रामे देशान्तरे तरुमूले भक्तगणाश्च ये, ॥७७॥
वासिनः प्रणतिं कृत्वा बाहूर्ध्वीकृत्य साकूतः ।
सादरं चरणं वन्दे तेषाँ परममंगलम् ॥७८॥
ये भूता ये भविष्यन्ति गौरांगभक्तसकुलाः ।
तृणदन्तो जनो वन्दे तेषां चरणपङ्कजम् ॥७९॥
पूर्व्वापरक्रमं हित्वा नामपदैव वन्दनम् ।
पूर्वापर महात्मनां शेषाणां श विधायिनाम् ।८०॥
वैष्णवमहिमागुणोऽगण्यो यथा तथास्तु सः ।
नाहं गणयितुं शक्तः शरणं केवलं मम ।८१॥
वैष्णववन्दनां नित्य पठेच्छ्रुयात्स्मरेच्चयः ।
क्लेशनिकरसंमुक्तः कृष्णप्रीतिं परां लभेत् ॥८२।
सम्बदन्विंशे पूर्णा गोवर्द्धन तटाश्रमे ।
सप्तपञ्चाशदब्दे हि पौषे य पञ्चमी तिथौ ॥८३॥

इति सर्वापराध-सर्वविपद्भञ्जन-श्री कृष्णप्रीति+ वर्द्धन-श्रीवैष्णववन्दना समाप्त ।

—०★०—

अथ श्री नामरत्नमाला

—०—

सर्वेषां सिद्धसाध्यानां व्रजरसः सुदुर्ल्लभः ।
तत्रापि च सुदुर्ल्लभो मधुराख्यः परो रसः ॥१॥
सोऽपि सुदुर्ल्लभो व्रजसुन्दरीणां कृपां विना ।
सापि सुदुर्ल्लभा तासां नाम-संकीर्तनं विना ॥२॥
अथातः कीर्तयेन्नाम तृणदन्तः सोऽयंजनः ।
नाथाः कुरुत मां कृपामनाथं दीनवत्सलाः ॥३॥
विज्ञप्ति चाटुपटुम्वा प्रार्थनं दैन्यबोधकम् ।
वाक्य मूढ़ो नजानामि नाम हि शरणं मम ॥४॥
तन्नामकीर्तने क्रमभङ्गजन्यदोषश्च यः ।
तं क्षमध्वं कृपाशीलाः कुरुतेऽध्याश्रयं जनः ॥५॥

इति उद्देश्यः

श्रीकृष्णः कोटिकन्दर्थलावण्यैकसुविग्रहः ।
श्रीराधिकामुखपद्मभृङ्गः केलिसुपण्डितः ॥६॥
श्रीराधा १ रतिसुन्दरी-दर्पहारिपदद्युतिः ।
श्रीगोविन्दमुखचन्द्रचकोरी चारुलोचना ॥७॥

१—कर्णिकायां, स्थिता पञ्चदशदिनोत्तर द्विमासाधिक, चतुर्दशां वर्षीया मध्यकैशोर यौवनेस्थिता ।

वसन्तकेतकी कान्तिर्मञ्जुला १ ऽनङ्गमञ्जरी ।
यथार्थाक्षरनामेयमिन्दीवरनिभाम्बरा ॥८॥
वेशविन्यास-कौशलचतुरा मधुरानना ।
श्रीराधिका-सहोदरा रूपगुण-मनोहरा ।
अनंगाम्बुजकुञ्जस्था कर्णिकोपदलास्थिता ॥९॥
इति कर्णिका ।
श्रीरूपमञ्जरी २ हेमकान्तिश्चीनजवाम्बरा ॥
नवगोरोचनाद्युतिर्ललिता ३ लोललोचना ॥१०॥
वामप्रखरस्वभावा शिखिपिञ्छनिभाम्बरा ।
ताम्बूलदानिहस्ताब्ज- सेवनोत्कोल्लसन्मुखी ॥११॥
कौबेरदलभवकुञ्ज- विद्युदाभ- मनोरमा ।
श्रीराधिकासप्तविंशदिनाधिकवय:क्रमा ॥१२॥
श्रीराधाकृष्ण सेवोत्कस्खलितयूथनाथता ।
स्वीकृताखिलभावेयं सन्धि ४ विग्रहिणी मता ॥१३॥
वनदेवी-सखीनाञ्च सर्वाध्यक्षतया स्थिता ।
कलावती निकुञ्जस्था कुञ्जसत्कारतत्परा ॥१४॥

१—श्रीराधिकाया देवरोदुर्नंदोऽस्या: पति: । उत्तरदिशि प्रधान-स्योपदलेस्थिता । २—केशरेस्थिता विभानुकन्या लवंगमाला, रंगनमालादिनाम । ३—पद्मदलेस्थिता । अस्या माता विशारदी, पिता विशोक: पतिर्भैरवनामा गोप: । ४—प्रेमपोषणार्थं प्रेम कलहेन यूनो विवादं कारयित्वा पुन: सन्धि मिलनं कारयति ।

रत्नप्रभा १ रतिकला सुभद्रा भद्ररेखिका।
सुमुखी च धनिष्ठा च कलहंसी कलापिनी ॥१५॥
इति ललितादलम्।

मञ्जुमाली २ सुवर्णांगीबिम्बौष्ठी क्षीणमध्यमा।
श्रीविशाखा ३ तड़ित् कान्ति स्तारावल्यसिताम्बरा ॥१६॥
राधा समवयोभावा गानवाद्यविशारदा।
सुवर्णदण्डचामर— हस्ताब्ज— परिशोभना ॥१७॥
ऐशान्यकुञ्जमेघाभा कन्दर्पोपायकोविदा ४।
कुञ्जाध्यक्षा मञ्जुमुखी गोविन्दे नर्मकर्मठा ॥१८॥
माधवीमालतीचन्द्ररेखिका कुञ्जरी तथा।
हरिणी चपला चैवं सुरभी च शुभानना ॥१९॥
इतिविशाखा-दलम्।
श्रीरसमंजरी ५ कुन्दपुष्पाभा नीलिमाम्बरा।
श्रीचित्रा कुङ्कुमद्युतिः काचवर्णवराम्बरा ॥२०॥
चित्रकुञ्जस्फुरत्पूर्वं माधवामोदिमार्द्दवा।
श्रीराधिकावयोन्यून——-षड्विंश-- शुभवासरा ॥२१॥

१—ललिताद्या अष्टसखी इति ललिताया उत्तरदलम्। २—ईशानदिशि केशरेस्थिता। ३—मुखराया भग्नीपुत्रपावनगोपः पिता जटिलायाः भग्नीकन्या दक्षिणा माता पतिर्वाह्निकनामगोपः। ४—सामदान भेददण्डचतुष्टयंतच्चवहर्षोत्पादनं द्रव्यार्पणं स्नेहवागानयनं शासनवाक्यश्च। ५—पूर्वेपद्मकेशरेस्थिता। ६—अस्य। वृषभानो. पितृव्य पुत्र चतुरगोपः पिता माता, चर्चिका पतिः पिठरः।

पानकरचनावशीकारप्रवेशकर्मठा ।
परीक्षणज्योतिर्विज्ञा कुञ्जाध्यक्षा शुभांगदा ॥२२॥
रसालिका तिलकिनी शौरसेनी सुगन्धिका ।
कामिनी कामनगरा नागरी नागवेलिका ॥२३॥
इति चित्रादलम् ।

चम्पाभा रतिमंजरी १ हरितालेन्दुरेखिका २ ।
दाडिमीपुष्पवसना कनिष्ठा दिवसत्रयैः ॥२४॥
मन्त्रसिद्धान्तसामुद्रहारगुम्फनकर्म्मठा ।
सर्वरत्न-परीक्षण सौभाग्ययन्त्र ३ कोविदा ॥२५॥
आग्नेयशुभ्रकुंजे हि हिरण्यांगी पालिन्धिकी ।
वामप्रखरस्वभावा स्थलदेवी-प्रयोजिका ॥२६॥
तुंगभद्रा रसोत्तुंगा रत्नवाटी सुसंगीता ।
चित्रलेखाविचित्रांगी मोदिनी मदनालसा ॥२७॥
इति इन्दुरेखादलम् ।
श्रीगुणमंजरी ४ दूर्वादलाभा श्यामलद्युतिः ।
दक्षस्था चम्पकलता ५ चम्पकपुष्पदेहाभा ॥२८॥
चाषपक्षपटी राधा—दिवसैकवयोन्यूना ।
दून्यादिविषयाभिज्ञा सूदशास्त्रे च कोविदा ॥२९॥

१—अग्निकोणं पद्मकेशरे स्थिता । २—अस्याः सागराख्यः पिता माता वेना पतिर्दुर्बलः । ३ वस्त्रं विलिख्य योर्नहिस्ते बन्धनं कृत्वा परस्परयो रागोत्पादनं सौभाग्य युक्तं च कारयतीत्यर्थः । ४—दक्षिण दिशिकेशरेस्थिता । ५—अस्या आरामः पिता, माता वाटिका, पतिश्चण्डाक्षो विशखा-समगुणा । ६—पाक शास्त्रे पण्डिता ।

सितोत्पलाकृतिपटु १ मिष्टहस्तेति विश्रुता ।
रत्नरेखा स्वकुञ्जस्था स्वगणाध्यक्षतां गता ॥३०॥
कुरङ्गाक्षी सुचरिता मण्डलीमणिकुण्डला ।
चन्द्रिका चन्द्रलतिका कन्दुकाक्षी सुमन्दिरा ॥३१॥
इति चम्पकलता-दलम् ।

विलासमञ्जरी २ रंगदेवी ३ किञ्जल्क-देहाभा ।
जवारागिदुकूलेयं कनिष्ठा सप्तभिर्दिनैः ॥३२॥
गन्धयुक्ताङ्गरागेषु पटुताहास्यरङ्गिणी ।
श्यामलकुजंनैर्ऋत्यां शिखावती च सेविका ॥३३॥
कलकण्ठी शशिकला कमला माधुरीन्दिरा ।
कन्दर्पसुन्दरी कामलतिका प्रेममंजरी ॥३४॥
इतिरङ्ग देवी-दलम् ।

लवङ्ग ४ मंजरीतुङ्गविद्या ५ कुङ्कुमचन्दना ।
दक्षिण-प्रखरा पाण्डुवस्त्रापश्चिम-सद्दला ॥३५
वीणा—गान्धर्व—विद्यायां रसनाट्यादि—शास्त्रेषु ।
आचार्या संज्ञावती च ६ राधापंचदिनाधिका ॥३६॥
सख्यश्च जलदेव्यश्च तत्रैषाध्यक्षतां गता ।
कन्दर्पमणिका सा च कुंजसेवा परायणा ॥३७॥

१—ओला इति २—नैर्ऋतकोणे पदमकेशरेस्थिता ।
३—अस्याः पिता रङ्गसारः करुणा माता, लज्जितायाः पत्युरनुजो रक्तेक्षणः पतिः । ४—पश्चिमदिशिकेशरेस्थिता । अरुणाम्बुजकुञ्जम् । ५—अस्याः पिता पौष्करः, माता मेधा, वालिशः पतिः, प्रखर स्वभावा । ६—हस्तादिना संकेतकार्यकुशला ।

मंजुमेधा सुमधुरा सुमध्या मधुरेक्षणा।
तनुमध्या मधुस्यन्दा गुणचूडा वराङ्गदा ॥३८॥

इति तुङ्गविद्या-दलम्।

कस्तूरीमंजरी १ सुदेविका २ भगिनीसमतां गता।
केशाञ्जनाङ्गसंस्कारपटुता शारीशिक्षका ॥३९॥
हरितकुंजवायव्यां कुंजस्था कुन्दकलिका।
उद्वर्तनविशेषे च कौशलाध्यक्षतां गता ॥४०॥
कावेरी चारुकवरी सुकेशी मंजुकेशिका।
हारहीरा महाहीरा हारकण्ठी मनोहरा ॥४१॥

इति सुदेवीदलम्।

मध्यस्थौ राधिकाकृष्णौ गौरश्याभोज्वलांकौ।
दिव्यवेश—स्वलकृतौ हास्योन्मुखपरस्परौ ॥४२॥
केशवस्थाष्टमंजरी प्रधाना नर्मदासिका।
मंजरीगण—धौरेया नेदिष्टा प्रीतिसेविका ॥४३॥
दलाष्टपरमप्रेष्ठा सखी वरिष्ठनायिका।
श्रीराधाकृष्णसेवार्थ——प्रकटानन्तवैभवा ॥४४॥
एतदष्टककल्पाभिरष्टाभिः कथितो वरः।
एता द्वादशवर्षीयाश्चलद्वाल्या कलावती ॥४५॥

१—वायुकोणे केशरे स्थिता। २—रक्तेक्षणस्य कनिष्ठो रक्षणोऽस्याः पतिः। रङ्गदेव्या यमज भग्नीयम्, रंगदेवीति मनुष्याणां भ्रमः स्यात् ३—वृषभानोर्मातुलेय—कलांकुर—नाम—गोपस्य सिन्धुमत्यां पत्यां कलावती जाता हरिचन्दनवर्णा कपोतः पतिः।

शुभाङ्गदा १ हिरण्यांगी २ रत्नरेखा ३ शिखावती ४ ।
कन्दर्पमञ्जरी ५ कुञ्जकलिका ६ अनंग मञ्जरी ॥४६॥
इति उपदलस्थिता ।

सम्पूर्णमंजरी ७ श्याममंजरी केलिमंजरी ।
रसालमंजरी नवमंजरी प्रेममंजरी ॥४७॥
श्रीलीलामंजरी मोनमंजरी भद्रमंजरी ।
श्रीरागमंजरी कुन्दमंजरी पद्ममंजरी ॥४८॥
रंगावली रसोल्लासा गुणतुंगा कलावरी ।
रत्नावली च कमलामदनाशोकमंजरी ॥४९॥

१—विद्युद्वर्णा विशाखाकनिष्ठा पतात्रपत्नी ।

२—शुद्धस्वर्णवर्णा सुरंगाहरिणी गर्भ जाता । तत्कथामाह—बृषभानोर्मित्रं महावसुः भागुरिणा पुत्रेष्टि यज्ञं कृतवान् । यज्ञोत्थितं चरुं महावसुपत्नी सुचन्द्रा भुक्त्वा स्तोक कृष्णं प्रसूतवती । तदा पृथ्वीपतितं चरुभागं सुरंगा हरिणी भुक्तवती काले हिरण्यांगी कन्यां रंगिणी हरिणीञ्च प्रसूता इति गर्गवाक्ये बृद्धगोपे न विवाहिता । ३—बृषभानुमातृष्वसुः पुत्रः पयोनिधिः तस्य पत्नी मित्रविन्दा तस्याः कन्याः मन.शिलावर्णभ्रमरवसना, अस्याः कुठारी पुत्रः कडारः पतिः कुठारी कृष्णं प्रति घूर्णनयना तर्जनवतीति ।

४—कर्णिका कुसुमवर्णा कुन्दलता — कनिष्ठां—भग्नीति । पिता पुष्करो माता कुरुविन्दा, पित्रा कृष्ण पतिं निश्चित्य अदत्तविवाहा ।६। पिता श्रीमल्लो माता कमलिनी इन्दीवरवर्णा इन्द्रधनुर्वस्त्रा स्वाभाविकपीततिलकिनीति । ७—उपदलबहिःस्थित — सामान्योपमंजरी गण इति ।

सुकेशिनी सुधामुखी स्तनतुङ्गा हरिप्रया।
मदनोन्मादिनी मदोन्मत्ता मदालसा तथा ।५०॥
गन्धोन्मदा रसोन्मदा चन्द्रिका कलभाषिणी।
गोपाली हरिणी काली मृगाक्षी नित्यमंजरी ॥५ ॥

इति सामान्य उपदलस्थिता।

पौर्णमासी १ महायोग-शक्तिर्माया विमोहिनी।
लीलाधिदेवता देवी सर्वकार्यसुखावहा ॥५२॥
लिङ्गिनी तापसीवेशा दूती प्रीतितराकुला।
नान्दीमुखी २ तथाविन्दुमती लीला-सहायिनी।५३॥
तपस्विनी राधाविप्रकन्या वननिवासिनी।
व्रजे पूज्या दूती ३ श्रेष्ठा पौर्णमास्यनुकम्पिता ॥५४॥
वृन्दा वृन्दारिका वीरा मदनिका च मालती।
वनदेवी वनाध्यक्षा वनशोभा विवर्धिनी ॥५५॥
जलदेवी जलेश्वरी जलसम्पद्विवर्धिनी।
श्रीयमुना सहायनी जलजपुष्पदायनी ॥५६॥

१—भगवती गोरी ईषद्दीर्घकाया काषायवसना शुभ्रकेशी नारदोपदेशेनावन्तीतो मधुमंगलेन सह व्रजवासं कृतवतीति। २—नान्दीअपि तथा कृतवती विन्दुमत्यासह। ३—स्वयंदूती आप्त दूती इति द्विधा। वाचिकांगिक चाक्षुष स्वाभियोगा स्वय दूता। आप्ता त्रिधा वाक्यं बिना इंगितेन या दौत्यं करोति सा अमितार्था। या आज्ञया करोति सा निसृष्टार्था। य पत्रेण करोति सा पत्रहारीइति त्रिधा, ता एव शल्पकारिणी दैवज्ञा, लिंगिनी परिचारिका धात्रेयी, वनदेवी सखी चेति।

शशिचन्द्रमुखी पत्रहारिका चामितार्थिका ।
गुणमाला निसृष्टार्था शिल्पकारी च दूतिका ॥५७॥
अथ शिल्पनियोगादेर्विवृतिः क्रियतेऽधुना ।
विग्रेह ग्रहिला १ सख्यः पिण्डकेली २ वितण्डिका । ५८॥
पुण्डरीका ४ सिताखण्डी ५ चारुचण्डी ६ सुदण्डिका ७ ।
अकुण्ठिता ८ कलकण्ठी ९ रामठी१० मठिकादय; ११ ॥५९॥
साग्रहा विग्रहादौ स्युः दूत्यः स्खलित-यौवनाः ।
पेटरी१२ वारवी१३वारी१४कोटरी१५कलिटिप्पनी१६ ॥६०॥

१—विवादादौ आग्रहयुक्ता इति । २—ताम्रवर्णा कृतपापं कृष्णंश्लिष्टवाक्येन स[illegible]न्तज्य विलज्जयतीत्यर्थं । ३-हरिद्ववर्णा, हरिद्वस्त्रा वितण्डावाक्येन स्वपक्षं स्थापयति कृष्णमित्राणि । ४—श्वेतवर्णा व्याघ्राजिन वस्त्रा व्याघ्रवत्तर्जति । ५-मधुरं काठिन्यं तर्ज्जंयति । ६-श्यामा तडिद्वस्त्रा चारुप्रचण्ड वाक्या । ७-शिरीषपुष्पाभा । ८-कृष्णास्यापराधं निजसमाजवृद्धयर्थं वदति । ९-कृष्णाचाटुवाक्याकांक्षयां राधामानप्रार्थना । १०-ललिताधात्रीपुत्री ११—कृष्णवाक्येन तदपराधं व्यक्ती करोति । १२-मृणालजटावृद्ध-गुर्ज्जरी । १३-गाबड़ी जाति देवतातपुष्पवर्णा । १४-अर्धवृद्धा । प्राभीर जाति । १६—रजकी ।

मारुण्डा १ मोटटा २ चूड़ा ३ चण्डगी ४ गोण्डिकादयः

पिण्डकेलि- पुरोगानामेताः स्युरनुगाः ६ सदा ॥६१॥

चातुर्यसन्धिकुशला शिवदा ७ सोमदर्शना ८ ।

सुप्रसादा९ सदाशान्ता१० शान्तिदा११ कान्तिदादयः ॥६२॥

दैवज्ञागौतमी १३ गार्गी १४ भृङ्गारिकादयस्तथा ।

कुब्जिका वामिनी स्वाहा सुलभा शाण्डिली स्वधा ।६३॥

शार्वी च १५ भार्गवी बृद्धा ब्राह्मण्यो १६ व्रजपूजिताः ।

देवाङ्गिनी च मान्त्रिकी तान्त्रिकी दूतिका वरा ॥६४॥

धन्या लज्जा खंजरीट नयना वनमालिका ।

मदोन्मदा च कौमुदी रङ्गणमालिका शुभा ॥६५॥

विन्ध्यमणिमतीरम्भा कादम्बरी चलासिक ।

वराङ्गदा सुमेधा च श्रीराधा सेविका परा ॥६६॥

१—कुम्भकारस्त्री । २—छागपालिका । ३—विधवावणिग्वधूः । ४—ब्राह्मणी । ५—उज्वलशिखा । ६—पिण्डकेलीनामनुगताः। ७—रघुवंशीया ८—चन्द्रवंशजा । ९—पुरुवंशजा १०—तपस्विनी ।११—विप्रकुलजा नारदोपदेशेनव्रजमागता । १२—पूर्वसमा । १३—कृष्णस्य विप्रपरिवार - वेद गर्भस्य पुरोहितस्य भार्या गौतमी । १४—गर्ग कन्या भागुरिपत्नीगार्गी । १५—सर्व्वस्य कन्या महायज्वनः पत्नी शार्वी । १६—श्रीमन्नन्दमहाराजस्य पुरोहितपत्न्योज्ञेया इति । १७—दैवज्ञकन्या मन्त्रतन्त्र कृत्वा दैवाविष्ट निवारयतीत्यर्थः ॥

रागलेखा कलाकेलिमंजुला शुद्धदासिका १ ।
लवंगमंजरी भानुमत्यादिः परिचारिका ॥६७॥

भानुमत्येक नाम्नी च श्रीरतिमंजरी स्मृता ।
गानवाद्यपरा २ पिककण्ठी प्रेमवती तथा ॥६८॥

रंगवती च मंजिष्ठा वस्त्रसंस्कार तत्परा ।
भाग्यावली बहिश्चरी मंजुपुण्या च सेविका ॥६९॥

भृंगावल्ली च पौलिन्दी मल्ला च सख्यदूतिका ।
चित्रकरी च पौलिन्दी चित्राणी चित्रकोविदा ॥७०॥

सुगन्धा ३ नलिनी प्रेम्णा काले यावकसेविका ।
धात्रेयी दूतिका धातृ-कन्या च वायवी तथा ॥७१ ।

नर्मदा मालिकाख्या च स्वसंगिनी समन्विता
लीलापद्मादिसत्पुष्पा यथाकाय सुसेविका ॥७२॥

मंजुला विन्दुला शन्धा मृदुला बालिकामुखा ।
राधिकानुचरी नित्यसेविका परमोत्सुका ॥७३॥

मदनामोदिमी मदा सुरति सुबला तथा ।
मणिमालेन्दुप्रभा च सम्वादवाहद्दूतिका ॥७४॥

१—आसां कृष्णेन सह परिहासादिकं. नास्ति । २—सन्ध्यादिकाले श्रीराधिकाज्ञया नृत्यगानबाद्यादिना श्रीराधादीः सन्तोषयतीत्यर्थः । ३—नापितस्य कन्या श्रीराधिकापदमलक्तकादिना शोभयति ।

मदन सुन्दरी चन्द्रा चित्रवेशा च भगिनी।
लीलावती च सुप्रिया सिद्धेशी १ दिशमास्थिता ॥७५॥
भेला च २ मरुला चाद्या निकुंजद्वारसेविका।
मधुरिका हिरण्याक्षो कस्तूरी तुलसी तथा ॥७६॥
धनिष्ठा माधुरी कुन्दलता ३ कांचनवल्लिका।
मालिका बकुलमाला पद्माक्षी पद्मलोचना ॥७७।
मधुमती च गीतज्ञा श्री ज्येष्ठा शशिरेखिका।
चन्द्रकान्तिश्चलापांगी रसज्ञा रत्नमालिका ॥७८॥
रंगिणी रंगणलता कुरंगनयना क्षमा।
लम्बिनी चन्द्रिका कान्ता क्रूरा शान्ता महोदय ॥७९॥
भीषणी नन्दिनी ४ ऽशोका सुपूर्व विमलाक्षरा।
शुभदा शोभना पुण्या हंसशीता च मालिनी ॥८०॥
देवीश्रुतिचरी मुनिप्राचीना च वरानना।
नवीना नव्यदेहा च नित्यसेवापरायणा ॥८१।
सख्य: कुसुमिका-विन्ध्या-ध्याननिष्ठादिकास्तथा।
आत्रेयी कामदाद्याश्च कृष्णस्नेहाधिकाश्च ता: ॥८२॥

१—व्रजभूमि-दिग्भागे योगपीठदिश्यादौ च:तुपञ्चनषष्ट नव दशमुखस्वर्णवेत्रहस्ता महाशक्ति देवता निवसतीति पद्मपुराणादौ विश्रुता। २—कुंजचतुर्द्वारे बृन्दाबृन्दारिका मेनामरूलादय: स्थिता: । ३—उपनन्दपुत्र सुभद्रस्य भार्या कून्दलता इति । ४—मल्लानामशनिरिति कृष्णवद् भीषणरूपा प्रतीयमाना ।

नित्यसख्यस्तु कस्तूरी-मनोज्ञा-मणिमंजरी।
सिन्दूरा चन्दनवती-कौमुदी-मदिरादयः ॥८३॥
प्राण सख्याश्च तुलसी वासन्ती कलभाषिणी।
प्रियम्वदा मधून्मदा कर्पूरलतिका तथा ॥८४॥
श्रीकेलि कन्दली कादम्बरी रत्नावली मुखाः।
प्रिय सख्यस्तु माधवी मालती तनुमध्यमाः ॥८५॥
मंजुकेशी शशिकला कामलतादयस्तथा।
परम प्रेष्ठिका १ प्रियनर्म्माश्च ललितादयः ॥८६॥
प्रखराश्यामला सुहृत्पक्षा च यूथनाथिका।
तटस्था भद्रिका कृष्णप्रिया वामा च दक्षिणा ॥८७॥
चन्द्रावली चकोराक्षी खंजनाक्षी मनोरमा।
तारा विचित्रा गोपाली मंगला विमललीला ॥८८॥
पद्मा शैव्या गौरी रंगा रंगिणी रंगमालिका।
कुङ्कुमा शङ्करी शारी कृष्णा विशारदा रमा ॥८९॥
कुमुदा कैरवी मञ्जुभाषिणी शारिका तथा।
ताराावली शारदाक्षी चन्द्रा च चन्द्रशालिका ॥९०॥
इन्द्रावली तरंगाक्षी गुणवती च भारती।
सारंगी सुमुखी शिवा हारावली च कामिला ॥९१॥

१—श्रीराधाकृष्णप्रेमाधिक्यात् वरिष्ठं समाज ललिताद्यष्टसख्यः तन्नयूनप्रेम आलिमण्डलं, तन्न्यूनप्रेमा आलिमण्डल, इति । २—वयस्यायूथ दासीयूथ दूतीयूथ इति त्रिधा । ३—चन्द्रभानु रत्नभानु वृषभानु, सुभानु, भानु इति पंच भ्रातरः । चन्द्रभानोरिन्द्रमत्यां पत्न्यां चन्द्रावली जाता । भगवत्यादेशेन गोवर्द्धनमल्लेन विवाहिता ।

मन्दराक्षी माधुरी च पालिका दशमी तथा।
यूथेश्वरी यूथनाथा यूथलक्ष वरांगना ॥९२॥
यूथेश्वरी गुणाग्रणी राधात्यन्ताधिका१ परा।
अनुराधा हि ललिता गान्धर्वा राधिका स्मृता ॥९३॥
विनीता करुणापूर्णा रम्यवाक् नर्मपण्डिता।
कीर्तिदा-कन्यका राधा श्री दामावरजोत्तमा ॥९४॥
मुखराहृक्सुधाप्री स्वमखी मञ्जरं गणी।
वृषभानुमहापुण्य - सजातल्हादरूपिणी ॥९५॥
स्नेहलाभीर - राजेन्द्रावत्सलाच्युतपूर्वजा।
यशोदा स्नेह सत्पात्री रोहिणीघ्रातमस्तका।९६॥
सुबलन्यस्त - सारूप्या गन्धर्वार्जुनसख्यदा २।
वसन्तोज्वज कोकिलगीत - कृष्णगुणश्रुतिः ॥९७॥
मधुमंगलनर्मोक्ति जनितस्मितचन्द्रिका।
अतुला पाककार्यार्थ — मधुराव्हान हर्षिता ॥९८॥
अम्बिकाविलम्बका३धात्री स्नेह क्रोडांक संस्थिता।
कृष्णपितामही — वरीयसीरंग मुदास्मिता।९९।

१—चन्द्रावल्यादयोहि पूर्ण यौवनेस्थिताः। श्रीराधिकादिव्यक्तयौवने. धन्यादयोनव्ययौवने, कलावल्यादयस्तुवयःसन्धौस्थिताइति।२—कृष्णे किचद्वता-त्सल्यवन्तो वयोगधिकावाःसुहृत्सखाया।रामसुभद्रमण्डलोभद्र—गोभट्टदयः। दास्यमिश्रसखामोद विशालादयः। तुल्यप्रियसखायस्तोककृष्णकिंकिण्यादयः। रहस्य सहाय-प्रियनर्म्मा, सनन्दन विदग्धन्ता ज्ञेया इति। ३—यशोदा प्रिय सखी कृष्णरक्षार्थं तपस्कृत्य महाबलिष्ठं जयविजय-पुत्रद्वयं प्राप्ता।

कुबला १ पीवरी तुंगी भरणी स्नेह मण्डिता ।
यशोदेवी २ यशःस्विनी ख्यात यशः सुचन्द्रिका ॥१००॥
सानन्दा नदिनी नन्दभीगिनी प्रीति सप्लुता ।
दुर्मद देवराभिज्ञा जटिलादृष्टि भीषिता ३ ॥१०१॥
तरलाक्षी ४तरलिका शुभदा मालिकांगदा ।
वत्सलाशारिका कृपा कपिलदय धृत स्नेहा ॥१०२॥
भारुंडा५घुंरा घोरा घर्घरा करवालिका ।
डिण्डिम भाषितश्याम कलंकांकित चन्द्रमाः ॥१०३॥
सुलम्बा लम्बिका चरकर्मिणी६बन्दिता सदा ।
माया७प्रत्यायिताभात — पतिलीलाविशेषला ॥१०४॥

१—पर्जन्योनारद वाक्येन नन्दीश्वरे नारायणमुपास्य उपनन्दा-भिनन्द-नन्द-सुनन्दनेति पन्चपुगान् प्राप्तवान् । तुंगी; पीवटी, यशोदा; कुबला; अतुलेतिक्रमेण तेषां भार्याः । २—यशोदा भग्नीति ।

३—कृष्णमाता महीभ्राता गोलगोपो यशोदाया मातुलस्तस्य भार्या जटिलाः काककृष्णवर्णा लम्बोदरीति । ४—यशोदासख्यः कृष्णमातृसमाः । ५—कृष्णस्य मातामहः सुमुखो मातामही पाटला तत्तुल्या । ६—प्रकटकाले गोप्यनुगतसाधनं कृत्वा का कुत्र कन्यारूपेण जातातामन्वष्य गृहीत्वा च श्रीराधा च समर्पयतीति चटकर्म्मिणी । ७-परमेश्वर्याः कृष्णनित्यकान्तायाः । कथमन्यपतित्वं विपक्षत्वं शास्यत्वं वा एतत्त्रयेसति तद्वयं कथं घटते । तत्र समाधानं सार्धं पद्यं नाह । योगमायया प्रत्यायिया सन् आभातभानो यो छायारूप-पतिम्तेन हेतुना लीला विशेषः परकीयस्तं लाति गृह्णाति या सा । अन्यपतिशून्ये कृष्णेन परकीया भावे तल्लीना न स्यादिति हेतोरित्यर्थः ।

करालश्वश्रूका १ सोमाभा बिपक्षा रसान्तिगा ।
कुटिला२कूटताधिक्य लीला कौशल वैभवा ॥१०५॥
वामा मध्या मधु स्नेहा मदीयभावशालिनी ।
मञ्जिष्ठा रागिणी मदनान्तभाव३ विभूषिणी ॥१०६॥
ललितमानिनी४ धीर—ललित—श्याम सुन्दरी ।
मुग्धा मध्या प्रगल्भा च धीराधीरांकभूषिता ॥१०७॥
कक्खटी५ रंगिणीसूक्ष्मधी सुन्दरी मयूरिणी ।
खेलाभिहृष्टहृदया कन्दर्प कुहलीप्रिया ६ ॥१०८॥
स्वस्निदा कंकती स्मस्यन्त्राख्यतिलकिन्यसौ ।
सुधांशुदर्पणाख्या च वेष कृष्ण सखार्थका ॥१०९॥
कृष्णकान्ता ब्रजानन्द गोविन्दानन्ददायिनी ।
ब्रजगोपाल गोपाली जीवमात्रैक जीवनम् ॥११०॥
अभीरी७ गुज्जरी गोपी बलवी हरिबल्लभा ।
श्रीलीलामन्त्र-संराध्या राधिका पर देवता ॥१११॥

१—विपक्षनायिका भावे मानादेरभावस्तेन समस्त रसास्वादन स्यादि इति हेतुः । २—अन्याधीनत्वं बिनालीलाबृद्धिर्नस्यादिति हेतुर्ज्ञेय । ३-मादनस्य वृत्तिभेदो दिव्येन्मादो यत्रोद्भूर्णा चित्रजल्पादयः प्रेममय्यवस्थाः सन्ति, अतोनायुक्तमिति । ४—कौटिल्यमानिनीति । ५—क्रमेण वानरी हरिणी शारी मयूरीणां क्रीडाभिहृषचितेति । ६-पुष्पवाटिका । ७-यदुवंश्या गोपावत्सवाख्याः, वैश्याचशुद्राणामाअभीरास्तन्यूना गुर्ज्जरा इति ।

श्रीकृष्ण रमणी रामा गोविन्दप्राणसंगमा ।
गोपालवल्लभा गोपी गोपाल प्राण वल्लभा ॥११२॥
गोपिनी गोकुलेन्द्राणी गोपिका गोधनेश्वरी ।
कुंजविहारिणी कुंजभूषण ब्रजवासिनी ॥११३॥
वृन्दावनेश्वरी राधा किशोरी रास सुन्दरी ।
लीलावती रतिप्रिया रासकीर्ति कलावती ॥११४॥
पुष्पहास्या विशालाक्षी कल्याणी कुलपद्मिनी ।
सर्व सौभाग्य सम्पूर्णा सदाकृष्ण मनोगता ॥११५॥
श्रीराधा परमाराध्या राधिका कृष्णवल्लभा ।
कृष्ण हरे[1] हरे कृष्ण नामामृत सुमज्जिता ॥११६॥
हरि हरीति हरीति हरिन्मणि निभाम्बरा ।
हरि हरीति कृष्णेति कृष्णनाम भूषिता ॥११७॥
कृष्णमयी कृष्ण कृष्ण कृष्णेति जपमालिका ।
कृष्ण कृष्णेति कृष्णेति कृष्ण २ सुधामुखी ॥११८॥
अविचिन्त्य महाशक्तिर्नामरूप गुणावली ।
राधेकृष्ण राधेकृष्ण जपनां प्रीतिदायिनी ॥११९॥
श्री राधा राधिका राधा राधा राधेति श्रीमती ।
गान्धर्विका[2] जयश्रीति श्यामजा कृष्ण मोहिनी ॥१२०॥

१—कृष्णानुरागिण्या राधायाः स्नानादि पञ्चकं तन्नाम्नैव जातमिति । २—असुरैः सह गोऽसुरयुद्धे पराभूताः गन्धर्वाराधिकायाः शरण गताः । राधिकाऽष्टभुजा अष्टभुजा भूत्वा असुरान् निहतवती । गन्धर्व रक्षया गन्धर्वाणामधीश्वरा, गानविद्याहेतुना वा ।

जय श्रीमति राधिके जय कुन्जविलासिनि ।
जय हरिप्रिये जय हरिवक्ष: स्वलकृते ॥१२१॥
जय राधे जय पूर्णे जय कृष्णप्रियेश्वरि ।
जय माधविके जय माधव रास रसिके ।१२२॥
जय श्रीराधिके जय श्री राधे जय राधिके ।
नाम्ना जययुताऽह्वान जयाभय प्रदायिके ॥१२३॥
हे राधे ! राधिके राधे हे कृष्ण प्राणवल्लभे !
हे गान्धार्वे ! कृपामयि ! हे वृषभानुनन्दिनि ॥१२४॥
हे चन्द्राननि गौराङ्गि, भक्तार्थाधिक साधिके ।
अयिकुण्डेश्वरि कृष्णकान्तागणशिरोमणे ॥१२५॥
अयिकुन्ड्तोर कुञ्ज-श्याम संग सुरंगिणी ।
अयि अयि सुभक्त्युपस्थित श्याममहार्थ दे ॥१२६॥
अयि भो: श्रीमति राधे ! स्वाश्रितजन पालिके ।
आऽह्वानद्रुतसचित्त स्वीयप्रीति प्रदायिके ॥१२७।
हा ! रासेश्वरी राधिका हा ! हा ! वृन्दावनेश्वरी ।
हा ! ललिता विशाखाली हा ! २ कृष्णविधुप्रिया ॥१२८॥
हा ! विधुवदनीधन्या हा ! हा ! सौन्दर्यशालिनी ।
हा ! हा ! सौभाग्य-साद्गुण्य-पौश्वर्यवृन्दवन्दिनी ॥१२९॥
हा ! हा ! गान्धर्विका देवी हा ! हा लक्ष्मी गुणाग्रणी ।
हा ! हा ! हा ! स्वामिनी गोरी हा'हा ! कारुण्यशालिनी १३०

१—स्तम्भस्वेदाद्यष्ट सात्विकभावा: । निर्वेदादित्रयत्रिशद्व्यभिचारि भावा;, भावहावहेलास्त्रयोऽगजाभावा: । शोभाकान्तिदीप्ति माधुर्यप्रगल्भतौदार्य धैर्यादि सप्तायत्नजभावा:, लीला-विलास-विच्छत्ति-विभ्रम—किलकिंचित मोट्टायित—कुट्टमित विब्बोक —ललित — चकित-दशस्वभावज भावा: । नीव्युत्तरीयधम्मिल्लस्रंशन-गात्रमोट्टनं जृम्भा-

हा !हा ! हा ! हा । प्रियसेवा-प्रिय-भक्तार्थसाधिका ।
काकूक्तिव्याकुला नवनीतसमा प्रियार्थदा ॥१३१॥
आनन्दघनचिन्मूर्त्तिः शुभसर्वांग भंगिमा ।
नानाभाव१ तरंगिणी गोविन्दहृदयंगमा ॥१३२॥
सर्वानन्द - चमत्कार - प्रेमरसावगाहिनी ।
आनन्दचिन्मयोज्ज्वलरससीमा – सीमंतिनी ॥१३३॥
परानन्दमयोज्वल – रससिन्धु प्रवाहिका ।
कृष्णमत्त करीन्द्रावगाहोच्छलित माधूरी ॥१३४॥
सौन्दर्य विन्दु - मोहित लक्ष्म्यादिगिरिजाकुला ।
कृष्ण सर्वेन्द्रिययोन्मादि - राधेत्यक्षरयुग्मका ॥१३५॥
इति नामरत्नमाला मधुर रसदायिका ।
रसज्ञकण्ठहृभ्दूषा राधिका प्रीतिदायिनी ॥१३६॥
ध्यात्वा वृन्दावनं दिव्यं सुवर्ण—चिन्मयस्थलम् ।
कल्पवृक्षलताभृंग मृग गोकुलःसेबितम् ॥१३७॥
तत्रपद्मगतं कुन्जं पीठं रासस्थलींन्च वा ।
सञ्चिन्त्य मध्यतो राधाकृष्णौकान्तागणवृतौ ॥१३८॥
तन्मध्ये मंजरी–रूपां स्वयूथ्यगण संगिनी ।
तद्रूपगुण माधुर्य्यं चन्द्र सुधा चकोरिणीम् ॥१३९॥
प्रीतिस्नेह रसस्नातां कृपालंकार भूषिताम् ।
आत्मानं चिन्मयित्वाथ पठेन्नामानि तः शुचि ॥१४०॥

घ्राणफुल्ल निश्वासोद्‌भास्बरा आलापादि विलापादि—वाचिकानुभावाः ।
एते भावतरंगा विद्यतेऽस्याः मिति ।

सोऽत्रैव दर्शनं प्राप्य अन्ते यास्यतितत्पदम् ।
यत्पदं दुर्लभं लक्ष्म्या गोप्यनुगतिका विना ॥१४१॥
गोप्यनुगतसिद्धात्मा गोपीनामामृतं पठेत् ।
गोपिका वल्लभं कृष्णस्तस्याशुहि प्रसीदति ॥१४२॥
सम्वद्नविशेपूर्णा गोवर्धनतटाश्रमे ।
षट्पञ्चाशदब्दे हिकार्तिक्याश्चाष्टमी तिथौ ॥१४३॥

इति श्री गोर्वधन गोविन्द कुण्डस्थ-श्री मनोहर-दासेन
विरचिता श्री नामरत्नमाला सम्पूर्णा ॥

विज्ञप्ति कणिका ।

संसारदुःख जलधौ पतितस्य काम—
क्रोधादिनक्रमकरै कवलीकृतस्य ।
दुर्वासनानिगडितस्य निाश्रयस्य
चैतन्यचन्द्र ! मम देहि पदावलम्बम् ॥१॥
हे नाथ ! गोकुल-सुधाकर सुप्रसन्न—
वक्त्रारविन्द मधुरस्मित हे कृपालो !
यत्र त्वया विहरते प्रणयैः प्रियारात्
तत्रैव मामपि नय प्रिय-सेवनाय ॥२॥

अथ प्रणामः

नमस्त्रिकाल सत्याय जगन्नाथ सुताय च ।
सभृत्याय सपुत्राय सकलत्राय ते नमः ॥१॥
श्रीकृष्ण ! करुणासिन्धो दीनबन्धो जगत्पते !
राधेश राधिकानाथ राधाकान्त नमोऽस्तु ते ॥२॥

अथ प्रणाम-श्री राधिकास्तवः

नमः श्रीकृष्णकान्तायै राधिकायै जयश्रिये ।
वृन्दावनेश्वरीं राधां गान्धर्वा मभिवादये ॥१॥
श्रीकृष्ण वल्लभां देवीं वृषभानु—कुमारिकाम् ।
निकुञ्ज नागरीं कुञ्जनागर—माधव प्रियम् ॥२॥
सुष्ठुकान्त महाभावरूपिणीं कृष्ण मोहनीम् ।
शृङ्गार - रसराट् राज्ञीं शृङ्गाराभीष्ट देवताम् ॥३॥

कृष्णरतिकला— केलिप्रमोद— मुदितान्तराम् ।
वन्दे सर्वकलाविद्या—पाण्डित्य-परमागतिम् ।।४।।
गीतजित—रुताकृष्ट-कृष्ण कृष्ण मृगा वलीम् ।
गौरश्यामाङ्कितश्यामां शिञ्जद्भूषण—माधुरीम् ।।५।।
रतिकेल्यमृतासार— कृतकृष्णद्रुमश्रिये ।
रतिकेलिचरोवर्याचर्यायै करवै नमः । ६।।
सखीसङ्ग— प्रियलाप— मधुपान— प्रमत्तधीम् ।
विद्याधरीस्पृहागुण—किङ्करीगण सेविताम् ।।७।।
कल्याण-स्वधुनीं वन्दे कारुण्यगुण शालिनीम् ।
वन्दे रासेश्वरीं राधां श्री मती ममिवादये ।।८।।
संसार—घोरकान्तारे पतितं मां निराश्रयम् ।
वासना—भल्लूकग्रस्तमुद्धर्त्तुं नाहमर्थये ।।९।।
नान्यमपि रसं कञ्चिन्मधुरमपि चान्यतः: ।
कामये रसशेखर—शेखरि ललितासखि ।।१०।।
किन्त्वये ! देवि श्रीम की वृन्दावन विलासिनी ।
श्यामेन रसराजेऽस्मिन् कुरुमां परिचारिकाम् ।।११।।
अयोग्य—दुर्लभ स्पृहा कृपां कृपण गामिनि ।
वितर करुणामयि प्रसीद मयि माधवि ।।१२।।

इति श्रीराधिका—प्रणामात्सकस्तवः सम्पूर्णः ।

—०—

ललितायै बिशाखायै चित्रायै चेन्दुरेखायै ।
चम्पक लतिकायै च रंगदेव्यै नमो नमः ॥१॥
तुंगविद्यां सुदेवीञ्च प्रणमामि स्वशिरसा ।
श्रीरूपं च मञ्जुलालीञ्च श्रीरस रति मञ्जरीम् ॥२॥
गुणविलाशमञ्जरीं लवंग कस्तूरीं तथा ।
सम्पूर्णादीन् गुरुरूमां मञ्जरीं प्रणमाम्यहम् ॥३॥

राधानुजे मम नमोऽस्तु अनङ्ग देवि
तुभ्यं सदा मधुमतिप्रियतामरन्दे ।
सौहार्द्द—सख्य विभले विमले नमस्ते
श्रीश्यामले परम सौहृदपात्रि राधे ॥४॥

पौर्ण मास्यं नमो नित्यं वृन्दादिभ्यो नमोनमः ।
सर्वेभ्वो ब्रजसुन्दरी गणेभ्य च ममोनमः ।५।

इतिप्रणामः सम्पूर्णाः

इति श्री गौरगोबिन्द नाम कीर्त्तन—रत्नमाला सम्पूर्णा ।

Vrindavan
Govind Kund Vrindavan
Nityananda Baba Ashram

मुद्रक :
गोविन्द शरन मीतल,
श्री प्रिन्टिग प्रेस, भरतपुर गेट, मथुरा।